दशरात्रसाध्ययज्ञविशेषः। यथा, तैत्तिरीयसंहितायाम्। ७। २। ५। २।
"त्रिककुद्वा एष यज्ञो यद्दशरात्रः ककुत्पञ्चदशः ककुदेकविंशः ककुत्त्रयस्त्रिंशो य एवं विद्वान् दशरात्रेण यजते त्रिककुदेव समानानां भवति॥")

त्रिकटः, पुं, (त्रीन् वातपित्तश्लेष्मदोषान् कटति नाशयतीति। कट+अच्।) गोक्षुरकः। इति शब्दरत्नावली॥

त्रिकटु, क्ली, (त्रयाणां कटूनां शुण्ठीमरीचपिप्पलीनां समाहारः।) मिश्रितशुण्ठीमरीचपिप्पल्यः। तत्पर्य्यायः। त्र्यूषणम् २ व्योषम् ३। इत्यमरः। २। १०। १११॥ कटुत्रयम् ४ कटुत्रिकम् ५। अस्य गुणाः। दीपनत्वम्। श्वासकासत्वगामयगुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसनाशित्वञ्च। इति राजनिर्घण्टः॥ तन्नामगुणाः।
"विश्वोपकुल्या मरिचं त्रयं त्रिकटु कथ्यते।
कटुत्रयन्तु त्रिकटु त्र्यूषणं व्योषमुच्यते॥
त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान्।
गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान्॥"
इति भावप्रकाशः॥

त्रिकण्टं, क्ली, (त्रयाणां कण्टानां हृहत्यग्निदमनीदुस्पर्शारूपाणां समाहारः।) मिलितहृहत्यग्निदमनीदुस्पर्शात्रयरूपम्। तत्पर्य्यायः। कण्टकारीत्रयम् २ कण्टकत्रयम् ३। इति राजनिर्घण्टः॥

त्रिकण्टः, पुं, (त्रीणि कण्टानि कण्टकानि यस्य।) गोक्षुरकः। इति शब्दरत्नावली॥ मत्रगुप्तवृक्षः। इति शब्दचन्द्रिका॥ तेकाँटासिज इति भाषा। मत्स्यभेदः। टेङ्गरा इति भाषा। अस्य गुणाः। पित्तकफनाशित्वम्। रूक्षत्वम्। अग्निदीपनत्वम्। लघुत्वञ्च। इति राजवल्लभः॥
(पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्॥
"त्रिकण्टः स्थलशृङ्गाटी गोकण्टोऽथ त्रिकण्टकः।
त्रिपुटः कण्टकफलः श्वदंष्ट्रा गोक्षुरः क्षुरः॥")
कण्टकः, पुं, (त्रीणि कण्टकानि यस्य।) लघुशर्करमत्स्यः। इति त्रिकाण्डशेषः॥ गोक्षुरकवृक्षः। इति हेमचन्द्रः। ४। २२२॥ (यथा,—
"त्रिकण्टः स्थलशृङ्गाटो गोकण्टोऽथ त्रिकण्टकः॥"
इति वैद्यकरत्नमालायाम्॥)

त्रिका, स्त्री, (तिस्रोऽस्रयो यस्याः। "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु च।" ५। १। ५८। इति कन्। ततष्टाप्।) कूपोपरिस्थपट्टप्रान्तभागः। भूमिस्थकूपपट्टम्। इत्यन्ये॥ कूपस्य समीपे रज्जुधारणार्थं त्रिच्छिदारयन्त्रम्। इति स्वामी॥ इत्यमरटीकायां भरतः॥

त्रिकायः, पुं, (त्रिकं आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयं अयति गच्छत्यस्मादिति। अय गतौ+अपादाने घञ्। यद्वा, त्रिकं त्रिकालमयति वेत्तीति। अय+अच्।) बुद्धः। इति हेमचन्द्रः। २। १४८॥

त्रिकार्षिकं, क्ली, (कर्षाय हितम् कार्षिकम्। त्रयाणां कार्षिकाणां समाहारः।) मिलितनागरातिविषामुस्तात्रयरूपम्। इति राजनिर्घण्टः॥

त्रिकालज्ञः, पुं, (त्रिकालं वर्त्तमानातीतभविष्यत्कालविवरणं जानातीति। ज्ञा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) बुद्धः। इति हेमचन्द्रः। २। १४६॥ सर्व्वज्ञे, त्रि॥ (यथा, वृहत्संहितायाम्। १७। १।
"युद्धं यथा यदा वा भविष्यदादिश्यते त्रिकालज्ञैः॥")

त्रिकालदर्शी, [न्] पुं, (त्रिकालं वर्त्तमानातीतभविष्यद्रूपं पश्यतीति। दृश+णिनिः।) ऋषिः। इति हलायुधः॥ भूतभविष्यद्वर्त्तमानवेत्तरि, त्रि॥ (यथा, वृहत्संहितायाम्। २१। ४।
"प्रध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति॥")

त्रिकालवित्, पुं, (त्रिकालं वेत्तीति। विद्+क्विप्।) बुद्धः। इति हलायुधः॥ त्रिकालज्ञे, त्रि॥

त्रिकूटं, क्ली, (त्रिकूटः पर्व्वतः उत्पत्तिस्थानत्वेनास्त्यस्येति अर्श आदित्वादच्।) सिन्धुलवणम्। सामुद्रलवणम्। इति रत्नमाला॥

त्रिकूटः, पुं, (त्रीणि कूटानि शृङ्गाणि यस्य।) पर्व्वतविशेषः। यस्योपरि लङ्का। (यथा, रामायणे। ५। २। १।
"स सागरमनाधृष्यमतिक्रम्य महाबलः।
त्रिकूटस्य तटे लङ्कां स्थितः स्वस्थो ददर्श ह॥")
तत्पर्य्यायः। त्रिककुत् २। इत्यमरः। २। ३। २॥ सुवेलः ३ त्रिसुकूटः ४। इति हेमचन्द्रः॥ त्रिशृङ्गः ५। चित्रकूटकः ६। इति शब्दरत्नावली॥ (अयन्तु पीठस्थानानामन्यतमः। अत्र भगवती रुद्रसुन्दरीरूपेण विराजते। यथा, देवीभागवते। ७। ३०। ६६।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥")
क्षीरोदसमुद्रतीरस्थपर्व्वतः। यथा,—
"सर्व्वरत्नमयः श्रीमान् त्रिकूटो नाम पर्व्वतः।
सुतः पर्व्वतराजस्य सुमेरोर्भास्करद्युतेः॥
क्षीरोदजलवीच्या यो धौतामलशिलातलः।
उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः॥
अप्सरोभिः परिवृतः श्रीमान् प्रस्रवणाकुलः।
गन्धर्व्वैः किन्नरैर्यक्षैः सिद्धचारणपन्नगैः॥
विद्याधरैः सपत्नीकैः संयतैस्तु तपस्विभिः।
वृकद्वीपिगजेन्द्रैश्च वृतगात्रो विराजते॥
पुन्नागैः कर्णिकारैश्च विल्वामलकपाटलैः।
चूतनिम्बकदम्बैश्च चन्दनागुरुचम्पकैः॥
शालैस्तालैस्तमालैश्च शरलार्ज्जुनपिप्पलैः।
तथान्यैर्व्विविधैर्वृक्षैः सर्व्वतः समलङ्कृतः॥
नानाधात्वङ्कितैः शृङ्गैः प्रस्रवद्भिः समन्ततः।
शोभितो रुचिरप्रख्यैस्त्रिभिर्व्विस्तीर्णैश्च सानुभिः॥
मृगैः शाखामृगैः सिंहैर्म्मातङ्गैश्च सदामदैः।
जीवञ्जीवकसंघुष्टैश्चकोरशिखिनादितैः॥
तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः।
नानापुष्पसमायुक्तं नानागन्धाधिवासितम्॥
द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः।
पाण्डुराम्बुदसंकाशं तुषारचयसन्निभम्॥
वज्रेन्द्रनीलवैदूर्य्यतेजोभिर्भासयन् दिशः।
तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम्॥
न तत् कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः।
नातप्ततपसो लोके ये च पापकृतो जनाः॥
तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्।
कारण्डवसमाकीर्णं राजहंसोपशोभितम्॥
गजो ह्यचलसंकाशो मदाच्चलितलोचनः।
तृषितः पातुकामोऽसाववतीर्णश्च तज्जलम्॥
स लीनः पङ्कजवने यूथमध्यगतश्चरन्।
गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्त्तिना॥
गरुडस्थो जगन्नाथो लोकाधारस्तपोधन!।
ग्राहग्रस्तं गजेन्द्रं तं तञ्च ग्राहं जलाशयात्॥
उज्जहाराप्रमेयात्मा तरसा मधुसूदनः।
स्थलस्थं दारयामास ग्राहं चक्रेण माधवः॥
मोचयामास नागेन्द्रं पाशेभ्यः शरणागतम्॥"
इति वामनपुराणम्॥
(घोटकविशेषः। यथा, नकुलकृताश्वचिकित्सिते। ४। ६।
"त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः।
त्रिकूटः स परिज्ञेयो वाजिवृद्धिकरः परः॥")

त्रिकूटलवणं, क्ली, (त्रिकूटं सामुद्रमिव लवणम्।) द्रोणीलवणम्। इति राजनिर्घण्टः॥

त्रिकोणं, क्ली, (त्रयः कोणा यस्य।) योनिः। इति शब्दार्थकल्पतरुः॥ (कामरूपपीठविशेषः। यथा, शब्दार्थचिन्तामणिधृतवचनम्।
"करतोयां समारभ्य यावद्दिक्करवासिनी।
शतयोजनविस्तारं त्रिकोणं सर्व्वसिद्धिदम्॥")
स्यात् नवपञ्चमलग्ने। इति दीपिका॥ (त्रिभुजक्षेत्रभेदः। इति लीलावती॥) त्र्यस्रे, त्रि। त्रिकोणवस्तूनि यथा। हलः १ शिवचक्षुः २ कामाख्या ३ वह्निमण्डलम् ४ एकारः ५ वज्रम् ६ शृङ्गाटम् ७ शकटादि ८ योनिः ९। इति कविकल्पलता॥

त्रिकोणफलं, क्ली, (त्रिकोणं त्र्यस्रं फलं यस्य।) शृङ्गाटकम्। इति भावप्रकाशः॥

त्रिक्षारं, क्ली, (त्रयाणां क्षाराणां समाहारः।) क्षारत्रयम्। मिलितस्वर्जिकाक्षारयवक्षारटङ्कणक्षाराणि। इति राजनिर्घण्टः॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे।
"सर्ज्जिका टङ्कणञ्चैव यवक्षार उदाहृतः॥")

त्रिक्षुरः, पुं, (त्रीणि क्षुराणीवाग्राणि यस्य।) कोकिलाक्षवृक्षः। इति रत्नमाला॥ कुलेखारा इति भाषा॥

त्रिखं, क्ली, त्रपुषम्। इति शब्दचन्द्रिका॥

त्रिखट्टं, क्ली, तिसृणां खट्टानां समाहारः। खट्टात्रयम्। इत्यमरः। २। ५। ४१॥

त्रिखट्टी, स्त्री, (तिसृणां खट्टानां समाहारः। "द्विगोः।" ४। १। २१। इति ङीप्।) त्रिखट्टम्। इत्यमरः। २। ५। ४१॥